# 2023

## SANSKRIT — HONOURS

**Paper : CC-11**

**(Vedic Literature)**

**Full Marks : 65**

MURALIDHAR GIRLS' COLLEGE
LIBRARY

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**विशेषोल्लेखं विना सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्।**

**Section - A**

**Unit - I**

**(Marks : 30)**

1. निम्नोद्धृतेषु यथाभिमतं ***मन्त्रद्वयस्य*** वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 5×2

MURALIDHAR GIRLS' COLLEGE
LIBRARY

(a) अ॒ग्निः पूर्वे॑भि॒र्ऋषि॑भि-
रीड्यो॒ नूत॑नैरु॒त।
स दे॒वाँ एह व॑क्षति॥

(b) प्रा॒वे॒पा मा॑ बृह॒तो मा॑दयन्ति
प्रवाते॒जा इरि॑णे॒ वर्वृ॑तानाः।
सोम॑स्येव मौजव॒तस्य॑ भ॒क्षो
वि॒भीद॑को॒ जागृ॑वि॒र्मह्य॑मच्छान्॥

(c) यं क्रन्द॑सी॒ अव॑सा तस्तभा॒ने
अ॒भ्यैक्षे॑तां॒ मन॑सा॒ रेज॑माने।
यत्राधि॒ सूर॒ उदि॑तो वि॒भाति॒
कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥

(d) अ॒हं सोम॑माह॒नसं॑ बिभ-
र्म्य॒हं त्वष्टा॑रमु॒त पू॒षणं॒ भग॑म्।
अ॒हं द॑धामि॒ द्रवि॑णं ह॒विष्म॑ते
सुप्रा॒व्ये॒३ यज॑मानाय सुन्व॒ते॥



MGC Library

2. निम्नोद्धृतेषु यथाभिमतं कस्य***चिदेकस्य*** मन्त्रस्य व्याख्या कार्या। 8×1

(a) अग्निना रयिमश्नवत्
पोषमेव दिवेदिवे।
यशसं वीरवत्तमम्॥

(b) मया सो अन्नमत्ति यो विपश्यति
यः प्राणिति य ईं शृणोत्युक्तम्।
अमन्तवो मां त उप क्षियन्ति
श्रुधि श्रुतं श्रद्धिवं ते वदामि॥

(c) नीचा वर्तन्त उपरि स्फुर–
न्त्यहस्तासो हस्तवन्तं सहन्ते।
दिव्या अङ्गारा इरिणे न्युप्ताः
शीताः सन्तो हृदयं निर्दहन्ति॥

MURALIDHAR GIRLS' COLLEGE
LIBRARY

***अथवा,***

अधोलिखितेषु सन्दर्भेषु यथाभिलाषम् ***एकतमस्य*** व्याख्या कार्या। 8×1

(a) आधाने तृतीयेष्टौ प्रथमाज्यभागस्यानुवाक्या।

(b) अग्नीषोमप्रणयने 'उप त्वाग्ने' इत्यादिकोऽनुवचनीयस्तृचः।

(c) प्राजापत्यस्य पशोर्वपापुरोडाशहविषां क्रमेणादितस्तिस्रोऽनुवाक्या ततस्तिस्रो याज्या।

3. (a) "कस्मै देवाय हविषा विधेम" – मन्त्रांशोऽयं कुत्र समाम्नातः? अत्र कः ऋषिः, का देवता, किं वा छन्दः? सूक्तेऽस्मिन् कति मन्त्राः? अत्र 'कस्मै' इति पदस्यार्थव्याख्यानपुरःसरं सूक्तस्यास्य दार्शनिकं तात्पर्यं निरूप्यताम्। 2+1½+½+3+5

***अथवा,***

(b) "अक्षैर्मा दीव्यः कृषिमित् कृषस्व"– मन्त्रांशोऽयं कुत्र समाम्नातः? अत्र कः ऋषिः, का च देवता? कृत्स्नस्यापि सूक्तस्य उपजीव्यं पर्यालोच्य सूक्तस्यास्य काव्यसौन्दर्यं निरूप्यताम्। 2+2+1+5+2

Unit - III

(Marks : 10)

4. (a) अधोलिखितयोः मन्त्रयोः वङ्गभाषया आङ्गलभाषया वा अनुवादः करणीयः। 5×2

(i) यस्यां समुद्र उत सिन्धुरापो
यस्यामन्नं कृष्टयः संबभूवुः।
यस्यामिदं जिन्वति प्राणदेजत्
सा नो भूमिः पूर्वपेये दधातु॥

(ii) विश्वंभरा वसुधानी प्रतिष्ठा
हिरण्यवक्षा जगतो निवेशनी।
वेश्वानरं बिभ्रती भूमिरग्नि–
मिन्द्रऋषभा द्रविणे नो दधातु॥

MURALIDHAR GIRLS' COLLEGE
LIBRARY

अथवा,

(b) अधोलिखितयोः यथाभिमतम् ***एकतरस्य*** मन्त्रस्य सप्रसङ्गं व्याख्या कार्या। 10×1

(i) अनुव्रतः पितुः पुत्रो माता भवतु संमनाः।
जाया पत्ये मधुमतीं वाचं वदतु शन्तिवाम्॥

(ii) येन देवा न वियन्ति नो च विद्विषते मिथः।
तत् कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः॥

***अथवा,***

(c) "सायंप्रातः सौमनसो वो अस्तु"— मन्त्रांशोऽयं कुत्र समाम्नातः? कोऽत्र ऋषिः, का वा देवता? सूक्तगतविषयं पर्यालोच्य सूक्तस्यास्य नामकरणस्य याथार्थ्यं प्रतिपाद्यताम्। 1+2+5+2

Section - C

Unit - I

(Marks : 10)

5. (a) अधोलिखितयोः वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 5×2

(i) मनवे ह वै प्रातः। अवनेग्यमुदकमाजहुर्यथेदं पाणिभ्यामवनेनिजानस्य मत्स्यः पाणी आपेदे।

(ii) शश्वद्ध झषऽआस। स हि ज्येष्ठं व्वर्धतेऽतिर्थीं समां तदौघ आगन्ता तन्मा नावमुपकल्प्योपासासै स औघ उत्थिते नावमापद्यासै ततस्त्वा पारयितास्मीति॥

अथवा,

(b) अधोलिखितयोः यथाभिलाषम् एकतरस्य सप्रसङ्गं व्याख्या कार्या। 10×1

(i) तत्र मत्स्य एव मत्स्यं गिलति।

(ii) तेनैतदुत्तरं गिरिमतिदुद्राव।

अथवा,

(c) शुनःशेपोपाख्यानं कुत्र समाम्नायते? को नाम शुनःशेपः? स केन कथं निष्क्रीतमासीदिति शुनःशेपाख्यानमाश्रित्य सविस्तरम् उपवर्ण्यताम्। 2+2+1+5

## Unit - II

(Marks : 15)

MURALIDHAR GIRLS' COLLEGE LIBRARY

6. निम्नोद्धृतेषु एकतमस्य सप्रसङ्गं व्याख्या कार्या। 7×1

(a) न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति।

(b) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रताः॥

(c) येनाहं नामृता स्याम् किमहं तेन कुर्याम्॥

7. (a) बृहदारण्यकोपनिषदमाश्रित्य ब्रह्म-स्वरूपं सम्यगालोच्यताम्। 8

अथवा,

(b) बृहदारण्यकोपनिषद् कस्मिन् वेदे समाम्नाता? अत्र कति काण्डानि, कति चाध्यायाः सन्ति? बृहदारण्यकोपनिषद-मनुसृत्य मैत्रेयी-याज्ञवल्क्यसंवादः सतात्पर्यं समासेन निरूप्यताम्। 1+1+6

---